**D**

SL. No. : ZZ

ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 57 ]
Total No. of Questions : 57 ]

**CCE PR UNREVISED**

[ ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 8
[ Total No. of Printed Pages : 8

ಸಂಕೇತ ಸಂಖ್ಯೆ : **67-S**

**Code No. : 67-S**

# ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ — ಸಂಸ್ಕೃತ

# Subject : Third Language — SANSKRIT

# तृतीय भाषा — संस्कृतम्

**( ಹಳೆ ಪಠ್ಯಕ್ರಮ / Old Syllabus )**

**( ಪುನರಾವರ್ತಿತ ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ / Private Repeater )**

ದಿನಾಂಕ : 04. 04. 2019 ] [ Date : 04. 04. 2019

ಸಮಯ : ಬೆಳಗ್ಗೆ 9-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 12-15 ರವರೆಗೆ ] [ Time : 9-30 A.M. to 12-15 P.M.

ಗರಿಷ್ಠ ಅಂಕಗಳು : 100 ] [ Max. Marks : 100

## *ಪರೀಕ್ಷಾರ್ಥಿಗಳಿಗೆ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :*

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು 57 ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

## *परीक्षार्थिनां सामान्यसूचनाः*

1. अस्मिन् प्रश्नपत्रे सप्तपञ्चाशत् (57) वस्तुनिष्ठाः व्यक्तिनिष्ठाश्च प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति इति वा पर्यालोचयत ।
3. व्यक्तिनिष्ठानां वस्तुनिष्ठानाञ्च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकृताः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

इतः कर्तयत

TEAR HERE TO OPEN THE QUESTION PAPER
प्रश्नपत्रमुद्घाटयितुमितः कर्तयत

Tear here

## भागः - A

### ( गद्य-पद्य-पूरकपाठाः )

### ( अङ्काः - 67 )

I. एकवाक्येन उत्तरं लिखत — 14 × 1 = 14

1. वामनः किमर्थं विरामम् इच्छति ?
2. अपूर्णानि राजगोपुराणि केन निर्मितानि ?
3. मेलायां सर्वजनाकृष्टं स्थानं किम् ?
4. पठनार्थं का आवश्यिका ?
5. विवेकानन्दः स्वशिष्यं कुत्र प्रेषयति स्म ?
6. अर्जुनः अन्ते किं ज्ञातवान् ?
7. तमोघ्नः कः ?
8. दिलीपः भूमिं काम् इव शशास ?
9. किं तथैव तिष्ठति ?
10. पूज्यः शैलः कः ?
11. भेददृशे किं भिन्नम् ?
12. अलङ्कारस्य भेदौ कौ ?
13. छन्दश्शास्त्रस्य कर्ता कः ?
14. प्रातिपदिकं नाम किम् ?

II. रिक्तस्थानानि पूरयत — 3 × 1 = 3

15. बिट्टिदेवस्य पुत्री ...................................... पीडिता ।
16. सर्वदा ............................................. अस्माकम् ।
17. आदत्ते हि ...................................... रविः ।

III. संयोज्य लिखत – 4 × 1 = 4

| अ | | आ |
|---|---|---|
| 18. दिवसेश्वरः | a) | मृत्तिकामयूरः |
| 19. क्रीडनकम् | b) | सूर्यः |
| 20. वेदव्यासः | c) | आत्मकर्म |
| 21. शुभाशुभम् | d) | महाभारतम् |
| | e) | चन्द्रः |
| | f) | रामायणम् । |

IV. **द्वित्रैः** वाक्यैः संस्कृतभाषया उत्तरं लिखत – 3 × 2 = 6

22. रघुवंशीयराजाः कथम् आसन् ?

**अथवा**

दिलीपस्य शुल्कसङ्ग्रहणं कथम् आसीत् ?

23. पञ्च अचोरहरणीयानि कानि ?

24. कतिविधाः जनाः देवं भजन्ते ? ते च के ?

V. श्लोकतात्पर्यं कन्नडभाषया आङ्ग्लभाषया वा लिखत – 2 × 2 = 4

25. न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ।।

26. भाषा भिन्ना वेषो भिन्नः
नीतिर्भिन्ना नियमो भिन्नः ।
भिन्ना जातिः भिन्नञ्च कुलम्
भिन्नावेव हि मतधर्मौ ।।

**अथवा**

परमस्माकं त्वेको देशः
परम्परा नस्त्वेकैव ।
सिद्धिसाधने श्रद्धास्थानम्
ध्येयोद्देशौ न तु भिन्नौ ।।

VI. संस्कृतभाषया अनुवादं कुरुत – 1 × 2 = 2

27. ನಗರದ ಸಮೀಪದಲ್ಲಿ ಸುಂದರವಾದ ಉದ್ಯಾನವಿದೆ. ಉದ್ಯಾನದಲ್ಲಿ ವಿಶಾಲವಾದ ಸರೋವರವಿದೆ.

कर्नाटकभाषया अनुवादं कुरुत – 1 × 2 = 2

28. कृषकाः ग्रामे निवसन्ति । ते क्षेत्रेषु श्रमेण कार्यं कुर्वन्ति ।

VII. कवेः देश-काल-ग्रन्थानां विषये लिखत – 1 × 3 = 3

29. भोजराजः ।

**अथवा**

वेदव्यासः ।

VIII. यथानिर्देशम् उत्तरं लिखत – 3 × 3 = 9

30. "हन्त ! वर्धते ते संरम्भः"

कः पाठः ? का अवदत् ? कम् अवदत् ?

31. "चतुष्षष्टियोगिनीचक्रं पूजय"

कः पाठः ? कः अवदत् ? कम् अवदत् ?

32. "स्पृहयामि खलु दुर्ललितायाम् अस्मै"

कः पाठः ? कः अवदत् ? कम् अवदत् ?

IX. कर्णाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा उत्तरं लिखत – 4 × 3 = 12

33. मेलुकोटे क्षेत्रम् अधिकृत्य लिखत ।

34. कर्णार्जुनयोः युद्धं वर्णयत ।

35. अक्कमहादेव्याः विषये लिखत ।

**अथवा**

'धूर्तो न सेव्यः' पाठस्य कथा लिखत ।

36. 'एकाग्रता' पाठस्य कथां लिखत ।

X. श्लोकद्वयं पूरयत – 2 × 4 = 8

37. कुण्डलीकृत ........................................................................

........................................................................ नमोऽस्तु ते ।।

**अथवा**

गुरवे ........................................................................

........................................................................ दक्षिणामूर्तये नमः ॥

38. सदयं हृदयं ........................................................................

........................................................................ करोति किम् ।।

## भागः - B
### ( व्याकरणविभागः )
### ( अङ्काः - 16 )

XI. अधोलिखितप्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह उत्तरपत्रिकायां लिखत । 12 × 1 = 12

39. 'रविः' अस्य पर्यायपदम् इदं भवति –

(A) चन्द्रः (B) सूर्यः

(C) कुजः (D) गुरुः ।

40. 'सेवक इति' अत्र एषः सन्धिः वर्तते –

(A) गुणसन्धिः (B) यण् सन्धिः

(C) विसर्ग सन्धिः (D) पूर्वरूप सन्धिः ।

41. 'असत्यम्' अस्य विरुद्धार्थकं पदम् इदं भवति –

(A) मिथ्या (B) सत्यम्

(C) असाध्यम् (D) साध्यम् ।

42. 'पत्रालयः' अत्र सन्धिविभजनम् एवं भवति –

(A) पत्र + आलयः (B) पत्र + लयः

(C) पत्र + लयः (D) पत्र + आलयः ।

43. 'ग्रन्थालयः' अत्र एषा विभक्तिः वर्तते –

(A) द्वितीया (B) चतुर्थी

(C) पञ्चमी (D) प्रथमा ।

44. "अन्यपदार्थप्रधानः" एषः समासः भवति –

(A) तत्पुरुषः (B) बहुव्रीहिः

(C) द्वन्द्वः (D) अव्ययोभावः ।

45. 'गच्छ' अत्र एषः लकारः वर्तते –

(A) लट् (B) लुट्

(C) लोट् (D) लङ् ।

46. अत्र एषः समानाधिकरणबहुव्रीहिः भवति –

(A) शूलपाणिः (B) चक्रपाणिः

(C) पद्मनाभः (D) लम्बोदरः ।

47. 'वार्ताम्' अस्य पदस्य लिङ्गम् इदं भवति –

(A) त्रिलिङ्गम् (B) पुल्लिङ्गम्

(C) स्त्रीलिङ्गम् (D) नपुंसकलिङ्गम् ।

48. एषु शुद्धं वाक्यम् इदं भवति –

(A) अशनं भिन्नं वसनं भिन्नम् (B) अशनः भिन्नं वसनः भिन्नम्

(C) अशनं भिन्नः वसनं भिन्नः (D) अशनो भिन्नं वसनो भिन्नम् ।

49. अत्र समूहेतरपदम् इदं भवति –

(A) ग्रामः (B) उत्सवः

(C) मेला (D) आपणः ।

50. 'प्रयच्छति' अत्र एषः पुरुषः वर्तते –

(A) प्रथमपुरुषः (B) मध्यमपुरुषः

(C) उत्तमपुरुषः (D) अन्यपुरुषः ।

XII. 51. चतुर्थपदं लिखत – 1 × 2 = 2

i) भृगोः अपत्यं पुमान् – भार्गवः वसुदेवस्य अपत्यं पुमान् – ........................... ।

ii) धीरस्य भावः – धैर्यम् चतुरस्य भावः – .......................... ।

52. कृदन्तपदं चित्वा लिखत – 1 × 2 = 2

i) देवी विराजमाना अस्ति ।

ii) बालकेन पाठः पठितव्यः ।

## भागः - C

### ( रचनाविभागः )

### ( अङ्काः - 17 )

XIII. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत – 1 × 2 = 2

53. "गगनं गगनाकारम्" ।

XIV. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दसः नाम लिखत – 1 × 2 = 2

54. तावच्च तेन च तथा च तदा च तच्च ।

XV. पत्रं लिखत – 1 × 4 = 4

55. कक्ष्याध्यापकं प्रति विरामपत्रं लिखत ।

**अथवा**

प्रवासविषये मित्रं प्रति पत्रं लिखत ।

XVI. प्रबन्धं लिखत – 1 × 5 = 5

56. संस्कृतभाषायाः गरिमा ।

**अथवा**

परिसरः ।

XVII. गद्यभागं पठित्वा प्रश्नानाम् उत्तरं लिखत – 4 × 1 = 4

57. एकदा कश्चन वृद्धः वनं गच्छति । तत्र सः आम्रवक्षं पश्यति । आम्रवृक्षे बहूनि फलानि सन्ति । सः फलानि खादितुम् इच्छति । वृक्षस्य उपरि कपयः सन्ति । वृद्धः एकम् उपायं करोति । सः शिलाखण्डैः कपीन् ताडयति । कपयः आम्रफलैः वृद्धं ताडयन्ति । वृद्धः आनन्देन फलानि खादति । "उपायेन सर्वं शक्यम्" इति अस्याः कथायाः नीतिः ।

i) कः वनं गच्छति ?

ii) वृक्षस्य उपरि के सन्ति ?

iii) वृद्धः कानि खादति ?

iv) अस्याः कथायाः नीतिः का ?